# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

### अध्याय ३०

ततः शूर्पणखा दृष्ट्वा सहस्राणि चतुर्दश ।
हतान्येकेन रामेण रक्षसां भीमकर्मणाम् ॥ १॥

दूषणं च खरं चैव हतं त्रिशिरसं रणे ।
दृष्ट्वा पुनर्महानादं ननाद जलदोपमा ॥ २॥

सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करम् ।
जगाम परमौद्विग्ना लङ्कां रावणपालिताम् ॥ ३॥

स ददर्श विमानाग्रे रावणं दीप्ततेजसं ।
उपोपविष्टं सचिवैर्मरुद्भिरिव वासवम् ॥ ४॥

आसीनं सूर्यसङ्काशे काञ्चने परमासने ।
रुक्मवेदिगतं प्राज्यं ज्वलन्तमिव पावकम् ॥ ५॥

देवगन्धर्वभूतानामृषीणां च महात्मनाम् ।
अजेयं समरे शूरं व्यात्ताननमिवान्तकम् ॥ ६॥

देवासुरविमर्देषु वज्राशनिकृतव्रणम् ।
ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसं ॥ ७॥

विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम् ।
विशालवक्षसं वीरं राजलक्ष्मणलक्षितम् ॥ ८॥

स्निग्धवैदूर्यसङ्काशं तप्तकाञ्चनकुण्डलम् ।
सुभुजं शुक्लदशनं महास्यं पर्वतोपमम् ॥ ९॥

विष्णुचक्रनिपातैश्च शतशो देवसंयुगे ।
आहताङ्गं समस्तैश्च देवप्रहरणैस्तथा ॥ १०॥

अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणम् ।
क्षेप्तारं पर्वताग्राणां सुराणां च प्रमर्दनम् ॥ ११॥

उच्छेत्तारं च धर्माणां परदाराभिमर्शनम् ।
सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा ॥ १२॥

पुरीं भोगवतीं गत्वा पराजित्य च वासुकिम् ।
तक्षकस्य प्रियां भार्यां पराजित्य जहार यः ॥ १३॥

कैलासं पर्वतं गत्वा विजित्य नरवाहनम् ।
विमानं पुष्पकं तस्य कामगं वै जहार यः ॥ १४॥

वनं चैत्ररथं दिव्यं नलिनीं नन्दनं वनम् ।
विनाशयति यः क्रोधाद्देवोद्यानानि वीर्यवान् ॥ १५॥

चन्द्रसूर्यौ महाभागावुत्तिष्ठन्तौ परन्तपौ ।
निवारयति बाहुभ्यां यः शैलशिखरोपमः ॥ १६॥

दशवर्षसहस्राणि तपस्तप्त्वा महावने ।
पुरा स्वयम्भुवे धीरः शिरांस्युपजहार यः ॥ १७॥

देवदानवगन्धर्वपिशाचपतगोरगैः ।
अभयं यस्य सङ्ग्रामे मृत्युतो मानुषादृते ॥ १८॥

मन्त्ररभितुष्टं पुण्यमध्वरेषु द्विजातिभिः ।
हविर्धानेषु यः सोममुपहन्ति महाबलः ॥ १९॥

आप्तयज्ञहरं क्रूरं ब्रह्मघ्नं दुष्टचारिणम् ।
कर्कशं निरनुक्रोशं प्रजानाम् अहिते रतम् ।
रावणं सर्वभूतानां सर्वलोकभयावहम् ॥ २०॥

राक्षसी भ्रातरं क्रूरं सा ददर्श महाबलम् ।
तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम् ।
राक्षसेन्द्रं महाभागं पौलस्त्य कुलनन्दनम् ॥ २१॥

तमब्रवीद्दीप्तविशाललोचनं
प्रदर्शयित्वा भयमोहमूर्छिता ।
सुदारुणं वाक्यमभीतचारिणी
महात्मना शूर्पणखा विरूपिता ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com